# ॥ अङ्गारकस्तोत्रम् ॥

अङ्गारकः शक्तिधरो लोहिताङ्गो धरासुतः।
कुमारो मङ्गलो भौमो महाकायो धनप्रदः॥ १ ॥

ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः।
विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः॥ २ ॥

सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः॥ ३ ॥

रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः।
नामान्येतानि भौमस्य यः पठेत्सततं नरः॥ ४ ॥

ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम्।
वंशोद्योतकरं पुत्रं लभते नात्र संशयः॥ ५ ॥

योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः।
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम्॥ ६ ॥

॥ इति श्री-स्कान्दपुराणे श्री-अङ्गारकस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Angaraka_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits